# उपसर्गः

## PREFIX

डॉ. कुलदीपशर्मा
सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम्,
जयपुरपरिसरः, जयपुरम्

# अधोलिखितानि वाक्यानि पठत



नद्याः प्रवाहः



रामस्य विवाहः



कर्तव्यस्य निर्वाहः

त्रिषु अपि वाक्येषु वाहः इति पदं समानम्, किन्तु; प्र, वि, निर् इत्येतेषां पदानां योजनेन पदस्य अर्थे भेदः जायते।

प्र, वि, निर् इत्यादयः 22 उपसर्गाः भवन्ति।
एतेषां प्रयोगेण शब्दानाम् अर्थे सुमहत् परिवर्तनं जायते।



उपहारः



उपाहारः



भोजनस्य अपेक्षा



भोजनस्य उपेक्षा

# उपसर्गः

उ
प
स
र्गाः

सर्वासु अपि भाषासु भवन्ति

यथा – हिन्द्यां भर (भरसक, भरपेट) अध, (अधपका, अधमरा)
उर्दूभाषायां बे (बेईमान, बेरहम), हम (हमउम्र, हमदर्द)
English Re (React, Research), Un (Undo, Unequal)
English भाषायाम् इमे PREFIX इति उच्यन्ते। Pre- पूर्व, Fix- स्थितम्



उपसर्गाः

प्रादयः– प्र, परा इत्यादीनाम् निपातसंज्ञा भवति।

उपसर्गाः क्रियायोगे– 'प्र'–आदीनाम् निपातानां क्रियायाः योगे उपसर्गसंज्ञा भवति।

वेदमन्त्रे तु उपसर्गाणां पदविहीनः पृथग्रूपेण अपि प्रयोगः दृश्यते, यथा हि– आ मन्द्रैरिन्द्र हरिभिर्याहि। अत्र आ+याहि इत्यनयोः पार्थक्यं व्यवधानं चास्ति।

वेदे तु पादपूरणार्थमपि उपसर्गस्य प्रयोगः आसीत्– प्र प्रायमग्निः

किन्तु; लौकिकसाहित्य तु पृथक्शः प्रयोगः अमान्यः अदृष्टश्च अस्ति। लौकिकसाहित्य तु क्रियातः पूर्वं क्रियायाः अंशतः पूर्वं वा उपसर्गाणां प्रयोगो भवति

प्रादयः 22 सन्ति

| | | |
|---|---|---|
| प्र | परा | अप |
| सम् | अनु | अव |
| निस् | निर् | दुस् |
| दुर् | वि | आङ् |
| नि | अधि | अति |
| अपि | सु | उद्/उत् |
| अभि | प्रति | परि |
| उप | | |

उपसर्गः

# उपसर्गेण धात्वर्थः बलादन्यत्र नीयते ।
# प्रहार–आहार–संहार–विहार–परिहार–वत् ।।




प्रहारः



आहारः



संहारः



विहारः



परिहारः
(त्यागः)



# उपसर्गः

**क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।**
**सत्त्वाभिधायकं नाम निपातः पादपूरणः।।**

**धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।**
**तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा।।**

उदाहरणम् –

| | | | |
|---|---|---|---|
| वि | बाधार्थः | विदेशः | विभक्तः (पृथक्) देशः |
| | उत्कर्षार्थः | विपुलम् | विशिष्टं पुलम् (व्यापकम्) |
| | विपरीतार्थः | विधवा | विगतः धवः (पतिः) यस्याः सा |

**प्रयोगस्तूपसर्गस्य धातुतः पूर्वतो भवेत्।**
**संधि–समासकार्यञ्च, जाते पदत्वमावहेत्।।**

**उपसर्गाणां योगे भवितव्यं सन्धिकार्यं समासकार्यं च विधेयम्**

उदा. प्रति+एकम् = प्रत्येकम् अति+क्रमणम् =

**उ**
**प**
**स**
**र्गः**

**अव्ययसंज्ञको ज्ञेयः,**
**पदार्थस्य विवर्तकः।**
**उपसर्गो विसर्गो वा,**
**निसर्गः सर्गतो यथा।।**

अव्ययत्वात् उपसर्गाणां रूपाणि न प्रचलन्ति।

**उपसर्गः –** **उप – सामीप्यम्**
**सर्गः – प्रकृतिः, सृष्टिः**

प्रकृतिप्रत्ययात्मकः शब्दो भवति। अतः सर्वदैव उपसर्गः प्रकृतेः एव भवति, न तु प्रत्ययात्। धातवः अनेकार्थकाः भवन्ति। उपसर्गाः धातूनां गुप्तार्थानां द्योतकाः भवन्ति।

## उपसर्गाणाम् अर्थाः

| | | |
|---|---|---|
| प्र | — | प्रकृष्टम्, उत्कृष्टम्, असीमितम् |
| परा | — | पृथक्, अनन्तरम्, विपरीतम् |
| अप | — | पृथक्, हानिः, दूरीकरणम् |
| सम् | — | संयुक्तीकरणम्, पूर्णता, संगतिः |
| अनु | — | पश्चात्, संयोगः |
| अव | — | अपमाननम्, दूरम्, अधः |
| निस् | — | निष्क्रमणम्, असंयोगः |
| निर् | — | निष्क्रमणम्, असंयोगः |
| दुस् | — | काठिन्यम्, दुष्करं कर्म, खलः |
| दुर् | — | काठिन्यम्, दुष्करं कर्म, खलः |
| वि | — | विशेषः, विपरीतम्, विरुद्धम्, विविधम् |

# उपसर्गाणाम् अर्थाः

| | | |
|---|---|---|
| आङ् | — | सर्वतः, स्वल्पम्, पर्यन्तम् |
| नि | — | विपरीतम्, अन्तः, पृथक् |
| अधि | — | अधिकम्, उपरि, वृद्धिः |
| अति | — | बहु, अतिक्रमणम्, वृद्धिः |
| अपि | — | समीपम्, उपरि, (भी) |
| सु | — | श्रेष्ठम्, पूर्णता, अधिकता |
| उद् | — | उपरिगमनम्, निष्क्रमणम् |
| अभि | — | समीपता, श्रेष्ठता |
| प्रति | — | विपरीतता, (ओर) |
| परि | — | सर्वतः, समीपता |
| उप | — | स्तुतिः, पार्श्ववर्तिता, तुलना, समीपता |

उपसर्गवैशिष्ट्यम्

# अपि अव उपसर्गयोः विशेषः

'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः'

आचार्यभागुरि इत्यस्य मतानुसारेण उपसर्गेषु **अपि** **अव** इत्यनयोः अ–कारस्य विकल्पेन लोपः भवति। उभयत्र अर्थः समान एव।

उदाहरणम् – पिधानम् (बन्द करना) = अपिधानम्
पिहितम् (बन्द करना) = अपिहितम्
पिकः (अपि कायति) = अपिकः
वलंबः = अवलंबः

उपसर्गवैशिष्ट्यम्

## ‘अपि’ विशेषः

संस्कृते ‘अपि’ इत्यस्य उपसर्गस्य हिन्दीभाषायां ‘भी’ इति अर्थः भवति। अस्य सर्वाणि अपि रूपाणि अव्ययरूपाणि भवन्ति, यथा – कोऽपि, अद्यापि, तथापि, इदानीमपि, अप्यधिकम्। यदि ‘अपि’ इति उपसर्गः वाक्यस्य प्रारम्भे समायाति, तर्हि तत् प्रश्नसूचकं भवति, यथा –

अपि कुशली भवान् ?

अर्थात् किं भवान् कुशली अस्ति ?

विक्रमोर्वशीयम् इत्यस्मिन् ग्रन्थे शक्यतार्थे अपि शब्दप्रयोगः अस्ति –

अपि नामाहं पुरूरवा भवेयम्

अर्थात् यदि अहं पुरूरवा अभविष्यम्, तर्हि कियत् उत्तमम् अभविष्यत्

अभिज्ञानशाकुन्तले अपि ‘भवतु नाम’ इत्यर्थं (चाहे) प्रकटयति, यथा –

इयमधिकमनोज्ञा वल्कलेनापि तन्वी।

| उदाहरणानि | |
|---|---|
| प्र | प्रभार:, प्रत्यक्षम्, प्रयत्न:, प्रबंधक:, प्रवासी, प्रयोजनम्, प्रपौत्र:, प्रपरश्व:, प्ररोटिका, प्रज्ञानम् |
| परा | परावर्तनम्, पराभव:, परामर्श:, पराकाष्ठा, पराजय:, परास्त:, पराजित:, परामृष्ट:, पराहत: |
| अप | अपहरणम्, अपमिश्रणम्, अपवर्ग:, अपवारणम्, अपसरणम्, अपशब्द:, अपकार:, अपकर्ष:, अपवाद: |
| सम् | संशोधनम्, संवितरणम्, समग्रम्, संवर्ग:, संवीक्षणम्, समुपदेश:, संवर्द्धनम्, संदेश:, संज्ञानम्, संचार: |
| अनु | अनुकूलनम्, अनुरक्षणम्, अनुज्ञप्ति:, अनुमोदनम्, अनुदेशनम्, अन्वय:, अनुग्रह:, अनुभव:, अनुमति: |

## उदाहरणानि

| | |
|---|---|
| निस् | निर्गमनम्, निष्क्रियता, निष्पादनम्, निष्पक्षता, निस्तारणम्, निष्कर्षः, निष्कासनम्, निश्चितम् |
| निर् | निर्विवादितम्, निर्द्वन्द्विता, निर्विकारम्, निर्मोही, निर्यातः, निर्वाहः, निर्वापणम्, निर्णयः, निर्वेदः, निर्झरः |
| दुस् | दुस्साहसम्, दुष्टः, दुष्प्रचारः, दुश्शासनम्, दुष्प्रवृत्तिः, दुस्स्वपनम्, दुष्करम्, दुष्कर्म, दुश्शला, दुश्शकुनम् |
| दुर् | दुर्लभम्, दुर्व्यवहारः, दुरुपयोगः, दुर्गन्धः, दुर्योधनम्, दुर्दिनम्, दुराचारः, दुर्गा, दुर्जनः, दुर्भाग्यम्, दुर्बलः |
| वि | विकेन्द्रीकरणम्, विलयनम्, विज्ञानम्, विजितम्, विपलता, विदेशः, विधवा, विचारः, विस्तारः |

**उदाहरणानि**

| | |
|---|---|
| नि | नियोजनम्, निलम्बनम्, निहितम्, निवेशः, निदर्शनम्, नितराम्, निग्रहणम्, निकटम्, निकषः, निक्षेपणम् |
| अधि | अधिकारः, अधिदेशः, अधिपतिः, अधिगमः, अधिष्ठितः, अधिकरणम्, अधिकम्, अध्यादेशः, अध्यापकः, अध्यायः |
| अति | अतिदेशः, अत्याचारः, अतिशयः, अतिरेकः, अत्युत्कटः, अतिक्रमणम्, अत्यधिकम्, अत्यन्तम्, अतिवादी, |
| अपि | किमपि, कुत्रापि, कोऽपि, कदापि, यथापि, तथापि, यद्यपि, यदपि, तदपि, नापि, वापि |
| सु | सुबन्धुः, सुगमः, स्वागतम्, सुशोभितम्, सुलभम्, सुकर्म, स्वादिष्टम्, सुतराम्, सुदेशः, सुविचारः |

उदाहरणानि

| | |
|---|---|
| अभि | अभियुक्तः, अभियोगः, अभिमतम्, अभिभावकः, अभिनवः, अभिप्रायः, अभिनेता, अभिनीतम्, अभिवादनम् |
| प्रति | प्रतिगमनम्, प्रत्युत्तरम्, प्रतिपूर्तिः, प्रतिकर्षः, प्रतिक्षणम्, प्रत्यकम्, प्रतिशोधनम्, प्रतिज्ञा, प्रतिनिधिः, प्रतिपादनम् |
| परि | परीक्षणम्, परिवारः, परिचयः, परिवर्तनम्, परिसरः, परिपक्वता, परित्यागः, पर्यावरणम्, परिषद्, परिश्रमः |

केषुचित् शब्देषु एकाधिक–उपसर्गाः अपि भवन्ति–

प्रति+आ+स्मरणम् = प्रत्यास्मरणम्   प्रति+अभि+ज्ञानम्= प्रत्यभिज्ञानम्

वि+आ+करणम्= व्याकरणम्   अति+उत्+कृष्टम्= अत्युत्कृष्टम्

* शब्दनिर्माणे अधिकाधिकं त्रयाणामेव उपसर्गाणां प्रयोगः भवितुमर्हः।

# शब्दनिर्माणम्

शब्दनिर्माणम्

## नूतनान् शब्दान् रचयन्तु

- वि, उप, अधि, प्र, अप, आ, प्रति, सं(स्)+कार:
- वि, उप, प्र, आ, प्रति, सम्, अनु, दुर्, नि, सु, उद्, अभि+योग:
- वि, प्र, प्रति, सम्, अनु, दुर्, उद्, अप, अति, अभि+वाद:
- सु, प्र, प्रति, निर्, आ, दुर्+वास:
- वि, उप, प्र, आ, सम्, अनु, उद्, अभि+चारणम्
- वि, प्र, सम्, दुर्, सु, उद्, पर+आ, अनु, अभि+भाव:
- वि, प्र, प्रति+अभि, सम्, अनु, सु+ज्ञानम्
- वि, प्र, प्रति, सम्, अनु, दुर्, उद्, अप, अति, अभि+नय:
- वि, प्र, प्रति, सम्, अनु, दुर्, नि, अभि+वृत्ति:
- वि, उप, प्र, आ, प्रति, सम्, अनु, दुर्, अव, सु, उद्, अधि+गतम्

# मूल्यांकनम

अधोलिखितेषु केषु शब्देषु उपसर्गप्रयोगः नास्ति ?

| | | |
|---|---|---|
| अपीतः | अवगमनम | अविषमः |
| अपारः | अपित्तम | निम्बः |
| अपिता | अपिष्टम | अपिनाकी |
| अवर्णः | अपीष्टम | प्रभुता |
| अवलेहः | अतिथिः | प्रभूता |
| अवतीर्णः | अतियक | अभिधा |
| विष्णुः | अभिन्नः | अभिदा |
| अवरः | परिशिष्टम | प्रथमः |
| अवध्यः | अपदम् | प्रप्रथमः |
| अवमनम | सुप्तः | |

आ
त्म
ने
प
द
वि
धा
न
म्

# आत्मनेपदविधानम्

उपसर्गाणां प्रयोगे केषाञ्चन धातूनां पदव्यवस्थायां परिवर्तनं भवति

•**नेर्विशः** – 'नि'–पूर्वकात् विश्–धातोः आत्मनेपदं भवति।

विश् (घुसना) = प्र+विशति=प्रविशति। किन्तु प्र इत्यस्य स्थाने अत्र नि–उपसर्गस्य प्रयोगे आत्मनेपदम् एव भवति, यथा हि– निविशते इति।

(निविशति इति असाधुपदम्)

•**परिव्यवेभ्यः क्रियः**–'परि/वि/अव'–पूर्वकात् क्री–धातोः आत्मनेपदं भवति।

क्री–धातुः उभयपदी अस्ति, अर्थात् क्रीणाति क्रीणीते इत्युभेऽपि रूपे भवतः। किन्तु; परि/वि/अव इत्यतेषां त्रयाणाम् उपसर्गाणां प्रयोगे आत्मनेपदमेव भवति। यथा हि – परिक्रीणीते, विक्रीणीते, अवक्रीणीते।

(परिक्रीणाति, विक्रीणाति, अवक्रीणाति इत्यतानि असाधुपदानि)

•**विपराभ्यां जेः**– 'वि/परा' इत्युपसर्गयोः प्रयोगे जि–धातोः आत्मेपदं भवति।

जि धातुः परस्मैपदी अस्ति, अर्थात् जयति* इति रूपं भवति। किन्तु; वि/परा इत्यनयोः उपसर्गयोः प्रयोगे आत्मनेपदमेव भवति। यथा हि – विजयते, पराजयते। (विजयति, पराजयति इत्यते पदे अशुद्धे)

# उपसर्गाणां प्रयोगे केषाञ्चन धातूनां पदव्यवस्थायां परिवर्तनं भवति

आ त्म ने प द वि धा न म्

•समवप्रविभ्यः स्थः— 'सम्/अव/प्र/वि'—पूर्वकात् स्था—धातोः आत्मनेपदं भवति।

स्था धातुः परस्मैपदी अस्ति, अर्थात् तिष्ठति इति साधुरूपं भवति, किन्तु; सम्/अव/प्र/वि इत्यतेषाम् उपसर्गाणां प्रयोगे आत्मनेपदम् एव भवति, यथा हि— सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते इति।

(सन्तिष्ठति, अवतिष्ठति, प्रतिष्ठति, वितिष्ठति इत्यतानि असाधुपदानि)

•अपह्नवे ज्ञः—गोपानार्थे अस्वीकरार्थे च ज्ञा—धातोः आत्मनेपदं भवति।

ज्ञा—धातुः उभयपदी अस्ति, अर्थात् जानाति जानीते इत्युभेऽपि रूपे भवतः। किन्तु; गोपानार्थे अस्वीकरार्थे च आत्मनेपदमेव भवति। ज्ञा—धातोः गोपनार्थः अस्वीकारार्थश्च 'अप'—उपसर्गयोगे एव भवति, यथा हि – अपजानीते।

(अपजानाति इति असंगतपदम्)

•उदश्चरः सकर्मकात् – 'उद्'—उपसर्गस्य प्रयोगे (सकर्मकात्) चर्—धातोः आत्मेपदं भवति।

चर्—धातुः परस्मैपदी अस्ति, अर्थात् चरति इति रूपं भवति। किन्तु;'उद्'—उपसर्गस्य प्रयोगे (सकर्मकात्) चर्—धातोः आत्मेपदं भवति। यथा हि – धर्मम् उच्चरते (धर्मम् उल्लङ्घ्य गच्छति इत्यर्थः)

(सकर्मके उच्चरति इति असंगतमेव)

आत्मनेपदविधानम्

## उपसर्गाणां प्रयोगे केषाञ्चन धातूनां पदव्यवस्थायां परिवर्तनं भवति

•समस्तृतीयायुक्तात्— सम्—उपसर्गपूर्वकात् चर्—धातुः यदि तृतीयान्तपदेन युक्ता भवति चेत् ततः आत्मनेपदं भवति; यथा हि— यानेन सञ्चरते इति। तृतीयान्तपदस्य अभावे सञ्चरति एव सिद्धपदम्।

(रामः रथेन सञ्चर ... द्धम्)

## परस्मैपदविधानम्

•व्याङ्परिभ्यो रमः

•उपाच्च— रम्—धातुः आत्मनेपदी भवति, अर्थात् रमते इति रूपं भवति। किन्तु; वि, आ, परि, उप इत्यतेषाम् उपसर्गाणां प्रयोगे रम्—धातोः परस्मैपदं भवति, यथा हि – विरमति, आरमति, परिरमति, उपरमति।

(विरमते, आरमते, परिरमते, उपरमते इत्यतानि पदानि असंगतानि)

# उपसर्गेषु दीर्घविधानम्

## उपसर्गस्य घञ्यमनुष्ये बहुलम्

- यदि अमनुष्यवाचकः घञन्तशब्दः उत्तरपदे भवति, तर्हि उपसर्गस्य बहुलं (विकल्पेन) दीर्घः स्यात्।
- उदाहरणम् –

  परि उपसर्गे – **परीपाकः** – **परिपाकः**

  प्रति उपसर्गे – **प्रतीकारः** – **प्रतिकारः**

  **प्रतीहारी** – **प्रतिहारी**

- मनुष्यार्थे तु – निषादः (मनुष्यवाचकशब्दः)

## इकः काशे

- इगन्तस्य उपसर्गस्य दीर्घः स्यात् काश इति उत्तरपदे।
- उदाहरणम् – **नीकाशः**
- इगन्तस्य अभावे यथा – **प्रकाशः**

उपसर्गाणां प्रयोगेण क्त्वाप्रत्ययान्तपदेष्वपि परिवर्तनं भवति। अतः आदौ क्त्वा–ल्यप् इत्यनयोरपि सामान्य ज्ञानं प्राप्तव्यम्, य

# क्तवा–ल्यप्–विधानम्

## समानकर्तृकयोः पूर्वकाले

- क्त्वा–प्रत्यय 'त्वा' इत्यवशिष्यते। 'त्वा' इत्यतदन्तपदम् अव्ययरूपेण भवति, अतः तस्य रूपाणि न प्रचलन्ति। यथा – कृत्वा, पठित्वा, भूत्वा।
- यदि धातोः पूर्वम् उपसर्गो भवति, तर्हि 'क्त्वा'–स्थाने 'ल्यप्' भवति। यथा – अनुकृत्य, प्रपठ्य, सम्भूय।
- यदि 'ल्यप्' इत्यस्य अवशिष्टः 'य' ह्रस्वस्वरात्परं समागच्छति, तर्हि 'तुक्'–आगमोऽपि भवति। यथा– सञ्चित्य, निश्चित्य।
- किन्तु, नञ्–समासे तु 'क्त्वा' एव भवति। यथा – अकृत्वा, अपठित्वा, अभूत्वा।
- 'च्वि'–प्रत्ययान्तपदैरपि 'ल्यप्' एव भवति, यथा– शुक्लीकृत्य, स्थिरीभूय।

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्त्वा | ल्यप् |
|---|---|---|---|---|---|
| दृश् | दृष्ट्वा | संदृश्य | वस् | उषित्वा | अध्युष्य |
| नम् | नत्वा | प्रणम्य / प्रणत्य | पा | पीत्वा | निपीय |
| घ्रा | घ्रात्वा | समाघ्राय | प्रच्छ् | पृष्ट्वा | संपृच्छ्य |
| गम् | गत्वा | आगत्य / आगम्य | वद् | उदित्वा | अनूद्य |
| नी | नीत्वा | आनीय | वच् | उक्त्वा | प्रोच्य |
| ग्रह् | गृहीत्वा | संगृह्य | कृ | कृत्वा | उपकृत्य |
| ची | चित्वा | सञ्चित्य | क्रीड् | क्रीडित्वा | प्रक्रीड्य |
| लभ् | लब्ध्वा | उपलभ्य | अर्च् | अर्चित्वा | समर्च्य |
| लिख् | लिखित्वा | विलिख्य | क्री | क्रीत्वा | विक्रीय |

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्तवा | ल्यप् |
|---|---|---|---|---|---|
| जि | जित्वा | विजित्य | ज्ञा | ज्ञात्वा | विज्ञाय |
| तॄ | तीर्त्वा | उत्तीर्य | त्यज् | त्यक्तवा | परित्यज्य |
| दह् | दग्ध्वा | संदह्य | दा | दत्वा | प्रदाय |
| धा | हित्वा | विधाय | धाव् | धावित्वा | प्रधाव्य |
| नृत् | नर्तित्वा | प्रनृत्य | बन्ध् | बद्ध्वा | प्रबध्य |
| भाष् | भाषित्वा | प्रभाष्य | मन् | मत्वा | अनुमत्य |
| भुज् | भुक्त्वा | उपभुज्य | मिल् | मिलित्वा | सम्मिल्य |
| रभ् | रब्ध्वा | आरभ्य | श्रु | श्रुत्वा | संश्रुत्य |
| सह् | सोढ्वा | संसह्य | स्मृ | स्मृत्वा | संस्मृत्य |

# उदाहरणानि

| धातु | क्त्वा | ल्यप् | धातु | क्तवा | ल्यप् |
|---|---|---|---|---|---|
| हा | हित्वा | विहाय | हस् | हसित्वा | विहस्य |
| भ्रम् | भ्रमित्वा | संभ्रम्य | वन्द् | वन्दित्वा | अभिवन्द्य |
| शप् | शप्त्वा | अभिशप्य | रच् | रचयित्वा | विरचय्य |
| रुद् | रुदित्वा | विरुद्य | शास् | शिष्ट्वा | अनुशिष्य |
| स्था | स्थित्वा | प्रस्थाय | सृज् | सृष्ट्वा | विसृज्य |
| स्तु | स्तुत्वा | प्रस्तुत्य | विद् | वेदयित्वा | निवेद्य |
| स्ना | स्नात्वा | प्रस्नाय | भक्ष् | भक्षयित्वा | संभक्ष्य |
| भी | भीत्वा | सम्भीय | भञ्ज् | भङ्क्त्वा | विभज्य |
| बुध् | बुद्ध्वा | प्रबुध्य | पॄ | पूर्त्वा | आपूर्य |

# उपसर्गं योजयित्वा ल्यप्–प्रयोगं कुरुत

१. अध्यापकः लेखं ........................ (लिख्) कार्यं करोति। (वि)

२. गृहण्यः गृहकार्यं ........................ (कृ) संस्कृत–सम्भाषण–शिबिरं गच्छन्ति। (सम्)

३. नितेशः आपणं........................ (गम्) भ्रात्रे उपहारम् .......... (दा) आगच्छति। (प्रति) (प्र)

४. भगिनी ईश्वरम्........................ (अर्च्) भोजनं स्वीकरोति। (सम्)

५. ते जनाः पत्राणि........................ (पठ्) आगच्छन्ति। (प्र)

६. ताः महिलाः आपणिकान् वस्तु–विषये........................ (प्रच्छ्) वस्तूनि क्रीणन्ति। (सम्)

७. जननी आपणात् फलानि ........................ (क्री) गृहम् आगच्छति। (वि)

८. ते बालकाः प्रातः काले मन्दिरे ........................ (स्था) प्रार्थनां कुर्वन्ति। (सम्)

९. अविनाशः संस्कृत–गीतं........................ (गै) अध्ययनं करोति। (सु)

१०. माता पुत्राय जन्मदिवसस्य शुभाशयान् ........................ (दा) उपहारं ददाति। (प्र)

## ल्यबन्तप्रयोगा:

१. मुख्यातिथि: दीपं प्रज्वालयति। कार्यक्रमस्योद्घाटनं करोति।
२. शिक्षक: छात्रान् ज्ञानेन सन्तोषयति। प्रश्नान् करोति।
३. भगिनी स्नातककक्षाम् उत्तीर्णवती। शिक्षाशास्त्रिपरीक्षां लिखितवती।
४. छात्रा: संस्कृताध्ययनं परित्यजन्ति। पश्चातापं कुर्वन्ति।
५. महापुरूष: जनान् उपदिशति। प्रभावितान् करोति।
६. अनिलकुम्बले कन्दुकं, प्रहरति। प्रतिस्पर्धिदलं प्रति प्रेषयति।
७. दुर्गा सखीं सम्मिलति। अजयमेरूं गच्छति।
८. बालिका बालकम् अवलोकते। परिचयं करोति।
९. शिष्या: गुरूं प्रणमन्ति। साक्षात्काराय गच्छन्ति।
१०. पादप: प्रतिकूलवातावरणेन विनश्यति। अस्तित्वं समापयति।
११. उत्तमा बालिका गृहकार्यं समाप्नोति। क्रीडति।
१२. नवविवाहित: मिष्टान्नम् आनयति। वितरति। मोदम् आप्नोति।
१३. दानवीर: बुभुक्षितेभ्य: भोजनं प्रददाति। पुण्यम् आप्नोति।
१४. गोपालक: दुग्धम् आपूरयति। विक्रयं करोति।
१५. व्यवसायी वस्तूनि विक्रीणीते। धनार्जनं करोति।
१६. सुखदास: गृहं प्रविशति। पाठनं करोति।
१७. स: कार्यात् विरमति। भोजनं करोति।
१८. कृष्ण: रहस्यं विजानाति। मां वदति।
१९. शुक: आकाशे उड्डयते। हर्षम् अनुभवति।
२०. स: शङ्काम् उत्पादयति। निवारणं करोति।
२१. राधा पुष्पम् आनयति। अर्चनां करोति।
२२. महेश: युद्धं विजयते। हर्षम् अनुभवति।

जयतु भारतम् जयतु संस्कतम

